नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥
— व्याख्यायताम्।

अथवा

ब्रह्मणः सृष्टेः कविसृष्टिः कथम् उत्कृष्टा इति मम्मटोक्तदिशा आलोच्यताम्।

⇒ काव्यप्रकाशकृता मम्मताचार्येण अदृष्टप्रतिबन्धकध्वंसाय 'मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युः' इति पतञ्जलिवचनात् शिष्यशिक्षार्थं तेषां मङ्गलाय च ग्रन्थादौ तत्प्रतिपाद्यविषयानुकूलां भारतीरूपां देवीम् अभिनन्दयितुं मङ्गलाचरणरूप आद्यश्लोकः प्रस्तूयते नियतिकृतनियमरहितामिति। अत्र प्रजापतिसृष्टेः कविसृष्टिः सदैव उत्कृष्टा परमरमणीया चेति व्यतिरेकमुखेन समुद्घोषितं कविना। कविसृष्टेः उत्कर्षं ख्यापयितुं चत्वारि विशेषणानि श्लोकेऽस्मिन् प्रदत्तानि। तथाहि नियतिकृतनियमरहिता ह्लादैकमयी अनन्यपरतन्त्रा नवरसरुचिरा च भारती कवेर्जयति इति फलति।

कविसृष्टिः नियतिनियन्त्रितसर्वविधनियमरहिता, पक्षान्तरे प्रजापतिसृष्टिः नियतिशक्त्या नियतरूपा, तस्मादेव प्रजापतिकृतौ पद्मं केवलं सरसि दृश्यते, अमृतञ्च केवलं क्षीरसमुद्रे। किन्तु कविकृतौ न विद्यते एकविधः कश्चित् नियमः। तथाहि प्रियाया अधरामृतपानवर्णना यक्षोद्याने असमयेऽपि समेषां कुसुमानां विकाशवर्णना च इत्यादीनि वर्णनजातानि कविसृष्टौ एव दृश्यन्ते, न तु प्रजापतिसृष्टौ। अत एव कवेर्भारती उत्कृष्टेति तत्त्वम्।

कविसृष्टिर्हि ह्लादैकमयी, ह्लादः सुखम्। अत्र एकशब्दः संख्येयवाचकः, तथाहि एकं वस्तु प्राचुर्येण प्रस्तुतं यस्यां सा एकमयी। ह्लादेन एकमयी ह्लादैकमयी, सुखमात्रप्रचुरामिति पर्यवसितोऽर्थः। सा ह्लादैकमयी कविवाङ्निर्मितिः सचेतसां चेतसि अमन्दानन्दं जनयति, पक्षान्तरे प्रजापतिसृष्टिः सुखदुःखमोहस्वभावा, सा च चित्ते यथाक्रमं सुखं दुःखं मोहं वा सञ्जनयति, तस्मादेव कविसृष्टिः

Signature ..............................

Scanned by CamScanner

प्रजापतिसृष्टेरुत्कृष्टौ।

कविसृष्टिरियं पुनः अनन्यपरतन्त्रा। अन्यस्य भारतीभिन्नस्य परतन्त्रा अधीना न भवति हि सा। अत्र परतन्त्रशब्दः 'त्वत्परतन्त्रो मत्परतन्त्रः' इति प्रयोगदर्शनाद् अधीने रूढः। तेन अन्यपरपदार्थयोः न पौनरुक्त्यमिति झालकीकरमतिः। अतो वाङ्निर्मितिव्यापारे कविः स्वतन्त्रः। तदुच्यते—

"अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥" इति।

कविसृष्टिस्तावत् नवरसरुचिरा विराजते। नवसंख्यकाः रसाः शृङ्गारादयो यस्यां सा नवरसा, अत एव सा रुचिरा मनोहरा, तथा च प्रजापतिसृष्टौ षण्णामेव रसानामुपस्थितिः दृश्यते अम्लमधुरादीनाम्। किन्तु कविकृतौ शृङ्गारादिनवरसाः सहृदयहृदयानि सततं ह्लादयन्ति, तस्मादेवोक्तं वृत्तौ—

"षड्रसा न च हृद्यैव तैः" इति।

एवमेव विविधकारणकलापैः कविवाङ्निर्मितिः ब्रह्मसृष्टेः विलक्षणा परमरमणीया च, अतः सा विजयतु इति कवेराशयः। तदुच्यते वृत्तौ—

'जयत्यर्थेन नमस्कार आक्षिप्यते, इति तां प्रत्यस्मि प्रणत इति लभ्यते' इति।

— अभिनवगुप्तपादेनापि समभाव एव प्रस्फुटितः—

"अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च।
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥" इति।

अत्रेदमवधेयं यत् प्रस्तुतेऽस्मिन् श्लोके गीतिश्छन्दः व्यतिरेकश्चालङ्कार इति शिवम्।

—०—

Signature Soumyajit Sen

Scanned by CamScanner